International Journal of Sanskrit Research 2021; 7(3): 01-05

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(3): 01-05
© 2021 IJSR
www.anantaajournal.com
Received: 02-03-2021
Accepted: 05-04-2021

**कमलिनी पण्डा**
अद्यापिका, संस्कृतविभाग:, मेघासन्
महाविद्यालय: नुदडिहा, मयूरभंजम्,
ओडिशा, भारत

**Corresponding Author:**
**कमलिनी पण्डा**
अद्यापिका, संस्कृतविभाग:, मेघासन्
महाविद्यालय: नुदडिहा, मयूरभंजम्,
ओडिशा, भारत

# शिशुपालवधमहाकाव्यस्य प्रथमसर्गे ध्वनिविचार: समीक्षात्मकम् अध्ययनम्

**कमलिनी पण्डा**

**अनुक्रमणिका**
साधारणत: शब्देभ्य: कोषव्याकरणादिभि: तथा लोकव्यवहारेण च निर्दिष्ट: अर्थ: यया वोद्दते सा अभिधा: । अभिधाया: अर्थ: मुख्य प्रयोजनरूप कारणद्वोयेन कदाचिद सम्बधिनं अन्यं अर्थं वोधयति । सेयं द्विआर्थ प्रभृति वुद्दि: लक्षणा । यथा - “गङ्गायां घोष:” ।[१]

(साहित्यपर्दण: पृ/७८)

अभिधाया: अर्थस्य अर्थात् व्याच्यार्थस्य वोधनानन्तरम् शब्दे यदि अर्थ प्रचुर्यम् विद्यते सोऽयम् अर्थ: ।

“वक्तृबोद्व्यवाक्यानामन्यसंनिधिवाच्ययो: ।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ।।”[२]

(साहित्यदर्पण: ३/२६)

**शिशुपालवधमहाकाव्ये माघस्य परिचय:**
अस्मिन्नतिविचित्रकविपरम्परावाहिनिसंसारे यावन्तो महाकवय: भरतलीलाङ्गणभूतं भारतदेशें स्वपावनपावनै: कृत्यै: नितरां समलञ्चक्रु: तेषु निखिलकविमैलिमालालालितचरणकमलस्य माघकवे: स्थानं स्वतन्त्रम् इति निश्चनेन ववतुं पार्यते । माघे सन्ति त्रयो गुणा: इति कथनेन माघस्य कालिदास- भारवि-दण्डीप्रभृतीनाम् एकायतनीभूतं स्वरूपम् आख्यायते । यथा कालिदासप्रणीतं रघुवंश-कुमारसंभवम्-ऋतुसंहार- काव्यत्रयं लघुत्रययीति प्रथितं तथा किरातार्जुनीय-शिशुपालवध-नैषधीयचरितकाव्यत्रयं बृहत्रयीति प्रथितम् । एषु त्रिषु बृहत्काव्येषु महाकविना माघेन प्रणीतं संस्कृतकाव्यमौलिमालायमानं शिशुपालवधं सर्वातिशायि । अस्मिन् महाकाव्ये प्रथमसर्गे ध्वनिविचार: मम विषयास्ति ।

**ध्वनि:**
साधारणत: शब्दस्य अर्थ: अभिधया वुध्यते । अतएव अभिधार्थ वाच्य: । तत्र वाच्यस्य वाधे सति लक्षणां आयाति । किन्तु मुख्यार्थं वाधां विना तस्मादेव धूपाद् सुगन्ध
इव व्यञ्जनार्थ: प्रतिभाति । तत्र कारणं वक्तृवोध्वव्यवाच्यानां ....वैशिष्ट्यात् अन्यं अर्थम् या वोधयेत् सा अर्थसंभवा ।।
अर्थात् आर्थीव्यञ्जना अनया लभ्य: अर्थ: अर्थध्वनि: । यथा- अहं गच्छामि इति वाक्यात् मम गमनम् इति वाच्यार्थ प्रकटति ।
किन्तु वक्ताश्रोता च यदि समवयस्कौ तरुणौ तदा ध्वनि: भवति गृहे मे प्रियतमा माम् अपेक्षते ।

शिशुपालवधमहाकाव्यस्य ध्वनिविचार:
श्रिय: पति: श्रीमति शासितुं जगत्-

जगन्निवासो वसुदेवसद्मिनि ।

वसन् ददर्शावतरन्तमम्बरा-

द्धिरण्यगर्भाङ्गभुवं मुनिं हरि: ।।

(शिशुपालवधम् १/१)

कमलाविलासः भगवान् जगन्नाथः जगतपालयितुं वसुदेवसद्मिनि वसन् । आकाशात् अवतरन्तं नारदं अपश्यत् इति मुख्यार्थः। अत्र वक्ता: कवि स्वयं । आशी नमस्क्रियावस्तुनिर्देशुवापि तन् मुखं इति काव्यलक्षणदृशा कविः श्री भगवत् उपस्थिति रूपक वसुनिर्दिशति । वक्तुः वैशिष्ट्यात् श्लोकेऽस्मिन् पदानि गम्भीरान् अर्थान् वहन्ति । तेन श्रीमति वसुदेवसद्मिनि इति अत्र श्रीमहालक्ष्मी वसुदेवसद्मनि निवशति कारणं तु स जगन् निवास श्रीपतिः । पतिं विहाय कथं वा श्री अन्यत्र तिष्ठेत् । अतएव सा वसुदेवसद्मनि तिष्ठति । जगन् निवास इति जगतां निवास अर्थात् प्रलयकाले यदुदरे स चराचरं जगत् वसति । पुनः जगति निवासः यस्य अर्थात् यः स निर्मितं जगत् प्रविहाय गान्यत्र कुत्रापि याति । तत् च जगत् स पालयति तथा शास्ति । अर्थात् कदाचित् यदि जगत् मलिनं तदा स तत् परिष्करोति । अतएव अत्र संपूर्णं काव्यस्य उदएस्यभुतः शिशुपालवधः ध्वन्यते । जगत् शासनेन शिशुपालस्य वधः अत्यन्तं आवश्यकः । साधारणतया जगत् यदा विपर्णं भवति तदा ब्रह्माद्योयः भगवन्तं प्रार्थयन्ति । ततः ब्रह्म स्व पुत्रं एव पैरयत । इति एवं अर्थात् अर्थध्वनिनां अत्र सन्निविष्टाः सन्ति ।

चयस्त्विषामित्यवधारितं पुरा-

ततः शरीरीति विभाविताकृतिम् ।

विभुर्विभक्तावयवं पुमानिति-

क्रमादमुं नारद इत्यबोधि सः ।।

(तत्रैव १/३)

कविः अधोऽवतरणस्य क्रमं वर्णयति । नभसि अत्यन्ते ऊर्धदेशे तेजपुञ्जं एव क्रमशः निचैः प्राणी इति चलमानं । अथ पुनः अद्य अवयव दर्शनावसरे कश्चित् पुरुष इति । ततः चक्षुगोचरमिते अकाशे नारदः इति भगवान् अजानात् इति मुख्यार्थः । किन्तु प्रथमतः तपोवलेन वलीयशः नारदस्य तपः प्रभावं वर्णयितुं तेजपिण्ड स्वरूपं कविः अवदत् । दिवः विच्युतं तत् तेजः क्रमशः रजोगुणेन गुणितम् । सत् पुरुषाकृतिं दधौ । कविः अत्र परमात्मनः जीवरूपेण अवतरणप्रकारं वर्णयति । यथा – ब्रह्मस्वरूपः आत्मा विन्दुरूपेण मातृगर्भे संचियते । तथा क्रमशः मासान्तरम् असष्टशरीरं ततः स्पष्टशरीरं ततः संपूर्णशरीरं लभते । तथैव भगवान् नारदः सर्गं निकषा आकाशे तेजमयः क्रमशः पृथीवि संपर्शात् अस्पष्टमूर्त्तिः पुनः पृथीविं निकषा स्पष्टावयवः । पुनः पृथीव्यां संपूर्णावयवः जातः । कविः अत्र नारदावतरेणछलेन आत्मावतरेणं सूचयति । आत्मावतरणेस्य तुल्यं एव नारदावतरेणं इति उपमाध्वनिः । संपूर्ण जन्मानन्तरं यथा नाम आत्मा गृह्णाति तथैव पृथीवि स्पर्शात् नारदः स्वेन नाम्ना परिचितः अभवत् । अत्र अलंङ्कारध्वनिः ।

अजस्त्रमास्फालितवल्लकीगुण-

क्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया ।

पुरः प्रवालैरिव पूरिताऽर्धया-

विभान्तमच्छस्फटिकाक्षमालया ।।

(तत्रैव १/९)

अस्य सरलार्थः भवति भगवान् नारदः स्व करेण अक्षमालां धरति या अक्षमाला पुराअङ्गुलि प्रतिविम्बितात् अरुणा पश्चात् भागे धवला । एवं मुनिं वर्णयन् अपि कविः मुनेः तपस्यां ध्वनिना वर्णयति । अजस्र निरन्तरं अर्थात् क्षणमयि यः विनया हरिनाम विणयन् स्वं समयं अतिवाहयति । न कदापि विना हरिनाम तिष्ठति । एवं भूता कश्चित् अपि संसारे नास्ति । आस्फालित वल्लकीगुणेन जातः यः क्षतः तेन उज्जलः यः नखः तस्य आरक्त अंशुभिः भिन्ना – प्रतिविम्बितां या अक्षमाला, अर्थात् करधृतामाला करस्पर्शभागे अरुजिता ।पश्चात् भागे किन्तु स्वयं स्व गुणेन धवला । एतेन कविः उपदिशति साधु सङ्गेन सहसा हृदयं क्षतं भवति । तेन हृदयस्थितिः परिवर्त्तिता भवति । यथा सदा शुभ्रा अक्षमाला मुनि नखस्पर्शात् प्रतिविम्बिता अरुणिमानं लेभे । हृदयपरिवर्त्तनं मालायाश्च वर्णाद्वपरिवर्त्तन समानम् इति उपमालंङ्कार ध्वनिः । अनवरत हरिनाम जपः वस्तुध्वनिश्च ।

रणद्भिराघट्टनया नभस्वतः-

पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।

स्फुटीभवद्ग्रामविशेषमूर्च्छना-

मवेक्षमाणं महत्तीं मुहुर्मुहुः ।।

(तत्रैव १/१०)

अधऽवतरणसमये पवनः स्वयं वीणातारमाध्यमेन प्रभाति । अतः स्वयं स्वर प्रमुत्पतिः भवति । इति विस्मितः नारदः स्व वीणां पश्यति इति मुख्यार्थः । नभस्वतः आघट्टनया अत्र तृतीयाविभक्तिः व्यनक्ति यत् पवनः स्वयं कौतुकेन मुनि वीणां वादयति । इति विरक्तिगत वस्तुध्वनिः । सर्वे सराः कस्यापि ग्रामस्य श्रृति विशेषाः भवन्ति । एकस्मिन् ग्रामे –

सराः षड्जाद्वोयः सप्तर्षगान्धार-

मध्यमा-पंचमोधैवतश्चैव ।

निषाद इति सप्तते-

तेषां संज्ञा सरिगमपद्यनि व्यपरामता ।।

(संङ्गीतदामोदर पृ/५५)

अतएव एषु षड्जादिषु विभिन्नस्वरा पवलेन कौतुहलात् वारिताः । नारदः विस्मितः सन् । पवनस्य कुतुहलम् वारम्वार पश्यति । नारदस्यान्तरे कुतुहलम् अपि कवि विवक्षितं भवति । तत्र कारणं तु मूर्च्छनानां व्यथ्ययेन समागमनम् ।

निवर्त्त्यसोऽनुव्रजतः कृतानती
नतीन्द्रियज्ञाननिधिर्नभः सदः ।
समासदत् सादितदैत्यसंपदः
पदं महेन्द्रालयचारुचक्रिणः ।।

(तत्रैव १/११)

अत्र नारदस्य सम्मानाय तं अनुगच्छतः । देवान् न्यवर्त्तयत् देवा नमस्कृत्य निवृत्ताः । दैत्यारे श्रीकृष्णस्य भवनं नारद प्रविवेश इति मुख्यार्थः । अथात्र व्यञ्जना । देवर्षिः नारदः सर्गे एवं प्रथितयषाः यत् देवाः इन्द्राद्याय सर्वे तस्य सम्मानाय अन्वागछन् । नभमण्डले यावत् देवर्षिः आसीत् तावत् ते पश्चात् विराजमाना आसन् । किन्तु कृष्णनगर्याः प्रचीरांन्तरे यदा नारदः प्राविशत् । तत

देवाः निवृत्ताः । निवृत्तिसमयेऽपि ते प्रणेमुः । इत्यनेन नारदे देवानां प्रतिः भक्तिश्च दयोर्व्येते ते । अत्र वस्तुध्वनिः । सादिता दैव्यानां संपत् समृद्धिः येन स तस्य एवं भुतस्य चक्रिणः सुदर्शन चक्रधारिणः पदम् राजधानीम् विवेश अत्र दैव्यानां समृद्धि नाशः यस्य व्यवसायः । तस्य भवनं नारदः आगत इति कस्यचित् दैतस्य वध प्रार्थनया इति वस्तुध्वनिः । महेन्द्रालय चारु इति अर्थात् अमरावत्याः अपि द्वारिकासुन्दरी । अतः अमरावतीं परितेज्य द्वारिकाप्रतिं भगवान् नारदः समागतः । तथा वज्रिणः अपि चक्रेणः प्रभावः अधिक इति वज्रिशासितां अमरावतीं हित्वा चक्रिपालिता द्वारिकां देवर्षिः समायातः इत्यपि वस्तुध्वनिः ।

पतत्पतङ्ग प्रतिमस्तपो निधिः
पुरोऽस्य यावन्नभुवि व्यलीयत ।
गिरेस्तडित्वा निवतावदुच्चकै
र्जवेन पीठादुदतिष्ठदच्युतः ।।

(तत्रैव १/१२)

अस्य मुख्यार्थः आकाशात् पतत् मार्तण्डवत् मुनिः भूमिः यावत् न स्पृशति तन् मध्ये उन्नतपर्वतात् वारिद इव उन्नतसिंहासनात् श्रीक्रिणः उन्नतसिंहासनात् नीचैः अवातरत् । अथ ध्वनिः । भगवान् नारदः भूमौ अवतरन् अपि स्वं तेजः न परित्यक्तवान् । भगवान् श्रीकृष्णः जगन्नियन्ताऽपि नारदस्य आतिथ्यं तथा वहुसम्मानं च कृतवान् । महान्तः सर्वेषां सम्मानं विदधति । एतेन कविः उपदिशति यत् निजापेक्षया अवतारणां अपि सम्मानहानिः न कर्त्तव्या इति वस्तुध्वनिः । श्रीकृष्णस्य व्यस्तता च तस्य आन्तरं उद्वेगं प्रकाशयति । यद्यपि नारदः अनवरतं नारायणनामः जपन् वर्त्तते तथापि श्रीकृष्णः तं प्रति शिष्यवत् व्यवहारं कृतवान् । इति एवं सामाजिकता अत्रापि वस्तुध्वनिनां द्यत्यते ।

अथप्रयत्नोन्नमिता नमत् फणै
र्धृते कथञ्चित् फणिनां गणैरधः ।
न्यधायिषामभि देवकी सुतं
सुतेन धातुश्चरणौ भुवस्तले ।।

(तत्रैव १/१३)

पृथिव्यां नारदः अवतरिष्यति इति ज्ञात्वा वासुकि प्रभृतयः स्वं मस्तकं प्रयत्नेन उन्नमयन्ति । तथापि शिरांसि मनन्ति । एवं अवस्थायां ब्रह्मपुत्रः नारदः भुवि पादौ न्यधात् । अथ ध्वनिः । भगवत् श्रीकृष्णस्य अपेक्षया अपि तपोनिधेः नारदस्य गुरुत्वम् अधिकम् । यतः भगवान् श्रीकृष्ण पृथिव्यां आसीत् । तदर्थं नागराजेन यत्नो न पृथीवि एवं भारवती अभवत् यदर्थं वासुकि शिरः अवनतं वभूवः । अतः तपसः भगवद्पेक्षया गुरुत्वं कवेः विवक्षितं इति वस्तुध्वनिः । तथा भगवतः न्युनता नारदस्य उत्कर्षता च वर्णिता इति व्यतिरेकालंकारध्वनिः । इति अलंकारध्वनिः ।

तमर्घ्यमर्घ्यादिकयादिपुरुषः
सपर्य्यया साधुसपर्य्यपूजयत् ।
गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः ।।

(तत्रैव १/१४)

अस्य अभिधेयार्थः भवति अर्घ-गन्धपुष्पादिभिः तं पूज्यं भगवान् श्रीकृष्णः पूजयामास । महर्षयः पाणिनां गृहान् गन्तुं न इच्छन्ति । अत्र अर्थान्तरन्यासालंकारः वाच्यः । अथ ध्वनिः । आदिपुरुषः अर्थात् परमपुरुषः पूर्णब्रह्म श्रीकृष्णः । किन्तु तपसा कर्मवन्तं नारदं स पर्यपूपुजत् । अत्र जङ्वन्त क्रियया ध्वन्यते साधारणपूजापेक्षया वहुमान्येन भगवान् नारदं पूजितवान् । इति प्रत्ययध्वनिः । तत्र कारणं व्यक्ति पूतात्मानः महर्षयः कार्यवशेन कुत्रचित् गच्छन्ति किन्तु पापिनां गृहान् अथवा श्रद्धाः विहीनानां गृहान् उपैयितुं स्नेहेन न इच्छन्ति । नारदस्तु परमेनस्नेहेन अथवा परमया भक्तात् श्रीकृष्णसदनं समेतः इति वस्तुध्वनिः ।

न यावदेता वुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्वताविव ।
स्वहस्तदत्ते मुनिमासने मुनि
श्चिरन्तनस्तावदभिन्यवीविशत् ।।

(तत्रैव १/१५)

मुख्यार्थस्तु – तुषारपर्वत इव धवलवर्णं नारदः, अंजनपर्वत इव भगवान् श्रीकृष्णः इति उभयोशोभां कलयितु सभासत् यावत् कलयति तत् समयमध्ये श्रीकृष्णः आसनं दत्वा तत्र मुनिः उपावेशयत् । अथ ध्वनिः । पुरातनः मुनिः विश्वस्य प्रथमः मुनिः भगवान् श्रीकृष्णः । यस्य नाभिकोमलात् समुतोपन्न ब्रह्मः वेदान् जगाद । नारदश्च ब्रह्मनः पुत्रः । अतः पुरातनमुनेः श्रीकृष्णस्य गणनया नारदः नप्ता भवति । किन्तु भगवान् तपोदृष्ट्या वा, गणनादृष्ट्या वा यवीयसं नारदं अव्यर्थं समान्नितवान् । नारदः नुतनमुनिः भगवत् तुलनया आर्शीवादयः । तथापि एतस्य नुतनमुने कर्म सम्मान्य तं आसने उपावेशयत् । इति भगवतः उदारता स्नेहशीलता च वस्तुध्वनिः । स्वहस्तदत्ते इति स्वहस्तशब्देन सम्राट् श्रीकृष्णः अन्यान् मान्यान् सेवकैः आसनं ददाति स्म । केवलं नारदाय स्वहस्तेन आसनं दत्तवान् इति नारदस्य स्वातन्त्रियं वैशिष्ट्यं च वस्तुध्वनिः ।

महामहा नीलशिलारुचः पुरो
निषेदिवान् कंसकृषः सविष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकै
रचुचूरच्चन्द्रमसोऽभिरामताम् ।।

(तत्रैव १/१६)

अस्य मुख्यार्थः भवति विशाललस्य इन्द्रनीलरत्नस्य समानकान्तिः श्रीकृष्णः । तस्य सम्मुखे धवलवर्णः नारदः उपाविशत् । संन्ध्यासमये उदयाचलरूढस्य चन्द्रस्य इव नारदः शुशुवे । अत्र ध्वन्यऽर्थस्तु भवति कंस कृषः अर्थात् कंस निधनकारिणः श्रीकृष्णस्य मुखं अवलोक्य नारदः उपाविशत् । येन आगामिशिशुपालवधप्रसङ्गः स प्रथयिष्यति इति वस्तुध्वन्यते । चन्द्रमसः अभिरामतम् अर्थात् मनोहरशीतलत्वम् चन्द्रमसः उदयाचलारूढस्य यथा भवति नारदोऽपि तथा प्रसन्नः शीतलः सन् महेन्द्रसंन्देशं प्रथयितुम् यतते स्म इति भाव्यर्थवस्तुध्वनिः । उपमालंकारस्तु अचुचूरत्क्रियया वाच्यः ।

विधाय तस्यापचितिं प्रसेदुषः
प्रकाममप्रीयत यज्वनां प्रियः ।
ग्रहीतुमार्व्चन् परिचर्य्यया मुहु
र्महानुभावा हि नितान्तमर्थिनः ।।

(तत्रैव -१/१७)

अस्य मुख्यार्थः भवति उपविष्टस्य नारदस्य पूजां विधाय भक्तानां याज्ञिकानां प्रिय भगवान् श्रीकृष्णः वहु आनन्दित अभवत् । पवित्रचरित्रवन्तः पूज्यान् पूजया सेविव्या परमानन्दिताः भवति । अत्र प्रस्तुतेन नारदार्चनेन अप्रस्तुतस्य महतां चरितस्य तुलनया अर्थान्तरन्यासालंकारः वाच्यः । अथ प्रतीयमानः अर्थः - भगवान् श्रीकृष्णः यज्वनां अर्थात् पूजकानां प्रियः । स स्वयं पूजया प्रीतः भवति

अतएव नारदस्य पूजां करोति इति वस्तुध्वनिः । प्रकामम् अप्रीयत अर्थात् अत्यन्तं आनन्दित अभवत् । नारदस्य अर्चनेन तस्यान्तरे परमाभक्ति अजायत इति रसध्वनिः ।

अशेषतीर्थोपहृताः कमण्डलो
निधाय पाणावृषीणाऽभ्यूदीरिताः ।
अघौघ विध्वसंविधौ पटीयसी
र्नतेन मर्ध्ना हरिरग्रहीदपः ।।

(तत्रैव १/१८)

अस्य अभिधेय अर्थः भवति स्व कमण्डलुमध्ये नारदः गङ्गादि सर्व सरितान् तथा तीर्थानां च जलं संचित्य रक्षति स्म । तैः जलैः स भगवन्तं निषिसे च । तं निषिक्तजलं मस्तकं अवनम्य भगवान् जग्राह । अथ ध्वनिः भगवन्तं परंब्रह्म इति नारदः सम्यक् ज्ञातवान् । तथापि तीर्थजलेन तं अभिषिसे च । परमभक्त त्वया नारायण सेवा अस्य परमाकर्त्तव्या इति स भगवन्तं विविधतीर्थजलैः सेचन माध्यमेन सिसेवे इति भगवति तस्य गाढाभक्तिः रसध्वनिः । दयामयः भगवान् श्रीकिष्णः भक्तवत्सलः मस्तकं अवनमय्य तत् अग्रहीत् इति भक्तवात्सल्यं रसध्वनिः ।

युगान्तकालप्रतिसंहृताम्तनो

झगन्तियस्यां सविकासमासत ।

तनौममुस्तत्रन कैटभद्विष –

स्तपोधनाभ्यागमसम्भवाः मुदः ।।

(तत्रैव १/२३)

अस्य मुख्यार्थः भवति महाप्रलये सति भगवतशरीरे समग्रं विश्वं न्युनं अतिष्ठत् । तथापि भगवान् जगतः अपेक्षया महान् । किन्तु नारदागम जनितानन्दः एवं अधिकः अभवत् यत् तस्मिन् शरीरे तस्मै स्थानं प्रर्याप्तं न अभवत् । अथात्र ध्वनिः विशाले शरीरे नारदागन्त जनितानन्दः जगत् अपेक्षया अधिकत्वया स्थानं अलभमानं मुखे हर्षरूपेण स्मितरूपेण च वर्हिः अभवत् । अत एव भगवान् श्रीकृष्ण स्मितेन अहसत् इति वस्तुध्वनिः । तथा नारदागमने तस्य अत्यन्त हर्षश्च वात्सल्य रसध्वनिः ।

निदाघधामानमिवधिदीतिं
मुदाविकासं मुनिमभ्युपेयुषी ।
विलोचने विभ्रदधिश्रितश्रिणी
सपुण्डरीकाक्ष इति स्फुटोऽभवत् ।।

(तत्रैव १/२४)

अस्य अभिधेयार्थः भवति भगवान् नारदः सूर्य इव अधिक तेजस्वी । तं पश्यतो भगवतो श्रीकृष्णस्य नयने आनन्देन अधिक स्फुटिते । अतएव सूर्यावलोकरेण पद्म यथा स्फुटति तथा कृष्णनेत्रे स्फुटिते इति श्रीकृष्णः पद्मलोचनः । काव्यकारणभाव सम्बोधात् काव्यलिङ्ग वाच्यालंकारः । अथ ध्वनिः पूर्ववत् श्रीकृष्णस्य आनन्दातिशय्यं भक्तवात्सल्यं प्रतिपादयति । नयनयोः व्याकचता आनन्दातिशय्यं व्यनक्ति ।

इति ब्रुवन्तं तमुवाच सव्रती
न वाच्यमित्थं पुरुषोत्तम त्वया ।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्यगुरुयोगिनामपि ।।

(तत्रैव १/३१)

अस्य मुख्यार्थः भवति भगवतः श्रीकृष्णस्य स्तुति वाक्यानि श्रृत्वा विनयी नारदः अवदत् हे पुरुषोतम ! तं एवं न वदः । तं एव द्रष्टव्यः इतः अपेक्षया योगिनां अपि महत्कर्म अस्ति किम् ? अर्थात् वास्ति । अत्र ध्वनिः भवति योगिनः तपस्यया यं योगवलेन पश्यन्ति । तं भवन्तं अहं अद्य प्रत्यक्षोन पश्यामि इतः अधिकं मम किम्बा भाग्यं स्यात् ? इति वस्तुध्वनिः । एतत् एवं मे सर्वश्रेष्ठ करणीयं इति अर्थः ।

लघू करिष्यन्नति भारभङ्गुरा
ममुंकिल त्वं त्रिविवादवातरः ।
उदूढ लोकत्रितयेन सांप्रतं
गुरुर्धरित्री क्रियतेतरां त्वया ।।

(तत्रैव १/३६)

अस्य अभिधेयार्थः भवति देवताभि अनुरूद्धः भवान् पृथीविभार हरणाय अवतारं गृहीतवान् । किन्तु समग्र विश्वम्भरः भवान् पृथिव्यान् विराजमानः तां अधिकां भारवतीं करोति इति दुर्भाग्यम् । अथ ध्वनिः अद्यापि भवान् पृथिविभार स्वरूपेण विद्यमानं शिशुपालं न हत्वा पृथिविं भारवतीं करोति इति वस्तुध्वनिः । पुनः स्वयं अपि अधिक गुरुत्वात् पृथिवि तव भारेण अधिक भारवती भवति इति लाभापेक्षया धरण्याः क्षति अधिका भवति इति अपि वस्तुध्वनिः ।

निजौजसौज्जासयितुं जगद्द्रुहा
मुपाजिहीथा न महीतलं यदि ।
समाहितैरप्यनिरूपितस्ततः
पदंदृशः स्याः कथमीश मादृशाम् ।।

(तत्रैव १/३७)

देवर्षिनारदः परमप्रम्णा भगवन्तं श्रीकृष्णं स्तौति – हे भगवन् ! निजवलेन विश्वशत्रुणां निपातनाय भवान् पृथिव्यां अवतार ग्रहणं कृतवान् । फलेन मादृशां भक्तानां नयनगोचरः अभवत् । अन्यथा महान्तसाधका वहुतपोभिः भवन्तं द्रष्टुं न समर्थाः भवन्ति । कथं वा अहं भवतः दर्शनं लभेय इति वाच्यार्थः । अथ ध्वनिऽर्थः- अहम् अपि वहुतपफलेन अद्य भवतः दर्शनं लब्धवान् इति मम महत् सौभाग्यम् । अहं च अन्येभ्यः तपसिभ्यः आत्मानं अधिकं भाग्यवन्तं मन्ये इति वस्तुध्वनिः ।

उपप्लुतं पातुमदो मदोद्धतै
स्त्वमेवविश्वम्भर विश्वमीशिषे ।
ऋतेरवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः ।।

(तत्रैव १/३८)

हे विश्वम्भर ! गर्वोद्धतैः राक्षसैः अत्याचारितं इदं विश्वं त्वं पालयितुं इछसि । यथा रात्रेः तमसा मलिनं आकाशं केवलं सूर्यएव स तेजसा निर्मलं करोति । तथा भवान् निजवलेन विश्वक्षति कारकान् राक्षसान् निहत्यं विश्वं पालयितुं क्षमः असि । अथ ध्वनिः इदानीं अपि शिशुपालं स गर्वेण उद्यत सन् विश्वस्य क्षतिं करोति । त्वां विना कस्य नाशाय अन्य कोऽपि समर्थः नास्ति । अतएव यथाशीघ्रं एतद् अर्थं प्रस्तुतो भव । इति वस्तुध्वनिः । त्वां विना पृथीवि दुःखिनी भविष्यति । भवतः विश्वम्भरतं विनष्टं भविष्यति । इत्यपि सूच्यः अर्थः ।

करोदि कंसादिमहीभृतां वधात्
जनो मृगाणामिव यत्तव स्तवम् ।
हरे हिरण्याक्षपुरः - सरासुर
द्विपद्विषः प्रत्युत सा तिरस्क्रिया ।।

(तत्रैव १/३९)

अत्र कंसनाशेन कंसारिनाम्ना भवन्तं आहूय लोका यां स्तुतिं कुर्वन्तिं एते कंस चारुणद्वोयः हिरण्याक्षस तुलनया साधारण हरिणा इव । भवान् हिरण्यकशिपु हिरण्याक्षादीन् निलया नखेन विदार्य हतवान् । तत् तुलनया कंसः सामान्यः । अथ ध्वनिः स एष हिरण्यकशिपु रावणः वभूव । पुनः अद्य शिशुपालरूपेण आगतः । अयं महान् बलवान् दिग्गजः । अस्य वोधार्थं भगवान् जातः इति अवश्यं अवधेयं । इति एवं रूपः अस्य काव्यस्य उदेश्यभूतः अर्थः अत्र ध्वनित्वेन विवक्षितः ।

तदिन्द्रसन्दतष्टमुपेन्द्र ! यद्वचः
क्षणं मया विश्वजनीनं मुच्यते ।
समस्तकार्य्येषु गतेन धुर्य्यता
महिद्विषस्तद् भवता निशम्यताम् ।।

(तत्रैव १/४१)

हे उपेन्द्र ! विश्वजनहिताय देवेन्द्रः यत् संकेतयति तत् मया इदानीं सूच्यते । अस्मिन् संसारे भवान् असंख्य कर्मभिः व्यस्तः । कदाचित् स कर्त्तव्यं विस्मरिष्यति इति मया स्मार्य्यते । अथात्र ध्वनिः यतो भगवान् वामनावतारे कश्यपस्य पुत्रः आसीत् ततः इन्द्रस्य कनिष्ठभ्राता । अग्रजत्वेन इन्द्रस्य भवन्तं वक्तुं अधिकारः अस्ति । भवान्श्च तस्य वाचं श्रधया गृह्णातु । यतः इन्द्राऽपि स्वार्थाय न किमपि वक्ति । विश्वहिताय एव तस्य वचनम् । अस्मिन् कॄीष्णावतारे शिशुपालवधः एव मुख्यं कर्त्तव्यं इति भवान् अवगछतु । इति एवं रूपः वस्तुध्वनिः ।

**उपसंहारः**

साधारणतया वाच्यार्थस्य प्रकाशनानन्तरं रमणीयार्थध्वनिः केवलं विचक्षणौरेव उद्भाव्यते । तत्र कारणं तु 'वक्तृ वोधव्यादि वैशिष्ट्यम् ।' अत्र हि प्रथमेसर्गे कदाचित् भगवान् नारदः तथा श्रीकृष्णः पुनश्च वर्णनाप्रसङ्गे क्वचित् क्वचित् स्वयं कविः वक्तृत्वेन समुपस्थिताः । ततः एषां मुखनिश्रृतवाण्यां वीरतायां तदन्तरगता ध्वनिधाराः चकास्ते । नारदस्य उपस्थानेन भगवतः अन्तरे या प्रीतिः उच्छवलिता तत्र देवर्षेः आगमन प्रथमं कारणम्, परमभक्तस्य निरन्तरं नारायणेति जपतः प्रियतमस्य भक्तस्य आन्तरिक ममतागाढत्वं प्रतिपादयति । एषा उक्तिस्तु स्वयं कवेः । एवं प्रायशः प्रतिश्लोकं ध्वनिवैपुल्यं वरीवर्त्ति । तत् तु पाठक हृदयस्य तीक्षणतां अपेक्षते इति दिक् ।

**सहायकग्रन्थसूची**


१. नाट्यशास्त्रम्/भरतमुनिः/अभिनवभारती/नागर रविशंकर/परिमल पब्लिकेशनस्/दिल्ली/चतुर्थ संस्करणम्/२०१२
२. साहित्यदर्पणः/कविराजःविश्वनाथ/शास्त्रीकृष्णमोहनः/लक्ष्मीटीका/चाखम्बा संस्कृतसंस्थान/वाराणसि/द्वितीयसंस्करणम्/२०१५ ।
३. काव्यप्रकाशः/ममट्टः/भट्टवामनाचार्येण/झलकीकरो/परिमल पव्लिकेशनस्/दिल्ली/प्रथमसंस्करणम्/२०१५
४. ध्वन्यालोकः/आनन्दवर्द्धनः/अभिनवगुप्तः/ड.शिवप्रसाद दिवेद्वि/सुरभारति प्रकाशन्/चौखम्बा/वाराणसि/प्रथमसंस्करणम्/२०१५
५. संस्कृतसाहित्यइतिहासः/हरेकृष्ण शतपथि/कल्याणि/कटक/प्रथमसंस्करणम्/ २०१२
६. शिशुपालवधम्/माघ/हरेकृष्ण शतपथि/नालन्दा/नूतनसंस्करणम्/२००१